# Shri Raghava Praptibodha

# શ્રીરાઘવપ્રાપ્તિબોધઃ

## Document Information

```
Text title : Raghava Praptibodhah
File name : rAghavaprAptibodhaH.itx
Category : raama, rAmAnanda
Location : doc_raama
Author : rAghavAnandAchArya
Latest update : January 22, 2024
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2024

*sanskritdocuments.org*

# શ્રીરાઘવપ્રાપ્તિબોધઃ

રાઘવં ચ ગુરું નત્ત્વા વ્યાસં બોધાયનં તથા ।
રાઘવપ્રાપ્તિબોધં હિ કુર્વે રાઘવભક્તિદમ્ ॥ ૧॥

બદ્ધોઽયમથ જીવાત્મા સમ્બદ્ધોઽનાદ્યમાયયા ।
ભવત્યવિદ્યયા ચાસ્ય ત્વહન્તામમતાદ્વયમ્ ॥ ૨॥

રાગદ્વેષદ્વયં ચાપિ જાયતેઽવિદ્યયાઽઽત્મનઃ ।
અવાપ્નોતિ તતશ્ચાયં જીવો દેહચતુષ્ટયમ્ ॥ ૩॥

શબ્દાદિવિષયેષ્વસ્ય જાયતેઽભિરુચિસ્તતઃ ।
વિષયાન્ સેવિતું ચાયમસન્માર્ગે પ્રવર્ત્તતે ॥ ૪॥

અસત્યભાષકસ્તત્ર ચાસક્તઃ સ્તેયકર્મણિ ।
હિંસાદિનિરતો ભૂત્વા નીચસેવામુપૈતિ હિ ॥ ૫॥

યદા યાતિ વિપન્નઃ સન્ કિઙ્કર્ત્તવ્યવિમૂઢતામ્ ।
તદા હૃદિ હિ રામસ્ય કૃપા કાઽપ્યુપજાયતે ॥ ૬॥

દયાર્દ્રો વીક્ષતે જીવં સ્વામી રામો દયામ્બુધિઃ ।
પ્રસન્નચિત્તતાં પ્રાણી રામપ્રીત્યોપયાત્યથ ॥ ૭॥

સત્વોદ્રેકં ચ સમ્પ્રાપ્તો ભૂત્વા સુકૃતમિચ્છતિ ।
સઙ્ગતિં ચ તતો યાતિ રામભક્તમહાત્મનામ્ ॥ ૮॥

વિષયેભ્યો વિરક્તાનામાત્માનાત્મપ્રબોધિનામ્ ।
સઞ્જાયતે તતશ્ચાસ્ય સદાચાર્યસમાશ્રયઃ ॥ ૯॥

શિષ્યભૂતં તતો જીવં સદાચાર્યઃ પ્રબોધતિ ।
શરીરાદિન્દ્રિયેભ્યોઽથ પ્રાણેભ્યો બુદ્ધિતસ્તથા ॥ ૧૦॥

ભિન્નો જીવશ્ચ નિત્યોઽણુઃ કર્ત્તા ભોક્તાઽથ ચેતનઃ ।
જગદ્ધેતોશ્ચ રામસ્ય શેષો દેહસ્તથૈવ ચ ॥ ૧૧॥

શ્રીરામપરતન્ત્રઃ સ ન સ્વતન્ત્રઃ કદાપિ હિ ।
રાઘવાધીનતાસીમા વૈષ્ણવાધીનતા મતા ॥ ૧૨॥

શ્રીરામપદકૈઙ્કર્યં ફલઞ્ચાસ્યા મતં બુધૈઃ ।
તસ્ય પ્રતિભટશ્ચાત્રાહઙ્કારઃ સમુદીરિતઃ ॥ ૧૩॥

મમકારસ્તથા દેહસમ્બન્ધોઽપિ તથા સ્મૃતઃ ।
શ્રીરામચરણાવેવ સમર્થૌ તન્નિવર્ત્તને ॥ ૧૪॥

જ્ઞાપકં કથિતાર્થાનાં રહસ્યત્રયમીરિતમ્ ।
ભવત્યથ કૃતજ્ઞો હિ શિષ્યશ્ચાસૌ તુ સદ્ગુરૌ ॥ ૧૫॥

સાત્વિકવૈષ્ણવાનાં ચ તતો યાતિ સુસઙ્ગતિમ્ ।
સદાચાર્યસ્ય કૈઙ્કર્યેઽધિકારં લભતે તતઃ ॥ ૧૬॥

સદાચાર્યસ્ય કૈઙ્કર્યં દ્વિધા પ્રાજ્ઞૈઃ સમીરિતમ્ ।
ઇષ્ટસ્ય કરણં ચાત્રાનિષ્ટસ્યાકરણં તથા ॥ ૧૭॥

અભાવે ચૈતયોશ્ચાત્ર શિષ્યં ત્યજતિ સદ્ગુરુઃ ।
આચાર્યેણ પરિત્યક્તં શ્રીરામો વિજહાતિ હિ ॥ ૧૮॥

અર્જનીયા તતઃ પ્રાજ્ઞૈઃ સદાચાર્યકૃપૈવ હિ ।
પ્રાપ્યતે સા ચ રામસ્ય તદીયસ્ય ચ સેવનાત્ ॥ ૧૯॥

રામરામીયસેવાતઃ પ્રસન્ને સતિ સદ્ગુરૌ ।
ગુરુપ્રીતે ચ શિષ્યે હિ શ્રીમદ્રામઃ પ્રસીદતિ ॥ ૨૦॥

સાકેતે પરમપ્રાપ્યઃ શ્રીરામઃ સકલેશ્વરઃ ।
સ્વપ્રીતેનૈવ સમ્પ્રાપ્તો રામો ભવતિ નાન્યથા ॥ ૨૧॥

શ્રીહર્યાનન્દ શિષ્યશ્રીરાઘવાનન્દ નિર્મિતઃ
રાઘવપ્રાપ્તિબોધોઽયં ભૂયાદ્ રાઘવભક્તિદઃ ॥ ૨૨॥

ઇતિ દુર્વાદધ્વાન્તમાર્ત્તણ્ડ જગદ્ગુરુ શ્રીરાઘવાનન્દાચાર્ય
સિદ્ધસંરાટ્પ્રણીતા શ્રીરાઘવપ્રાપ્તિબોધઃ સમ્પૂર્ણઃ ।

Proofread by Mrityunjay Pandey

*Shri Raghava Praptibodha*
pdf was typeset on January 23, 2024

Please send corrections to *sanskrit@cheerful.com*